मञ्जरी। ई, चुक्तः। यङ्यान्तोऽयमित्येके। अभिषवः स्नानं मन्थनं पीडनं सन्धानञ्च। इति दुर्गादासः॥

चुचुः, पुं, छुच्छुन्दरिः। इति शब्दरत्नावली। ८३॥ (सङ्करजातिविशेषः। यथा, मनुः। १०। ४८।
"मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्॥"
"चुञ्चुमद्गुश्च वैदेहकवन्दिस्त्रियोर्ब्राह्मणेन जातौ बौधायनेनोक्तौ बोद्धव्यौ।" इति तट्टीकायां कुल्लूकभट्टः॥ व्याकरणोक्तप्रत्ययविशेषः। स तु प्रसिद्धार्थे भवति। यथा, विद्यया वित्तो विद्याचुञ्चुः। इति सिद्धान्तकौमुदी॥ स्त्री, उद्भिज्जविशेषः। चेञ्चुगा इति लोके। नाडीचवत्। अस्याः पर्य्याया गुणाश्च यथा,—
"चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका।
चुञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"शुष्कवेत्राया चुञ्चोर्वा लोणिकाया रसैरपि॥"
इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

चुञ्चुरी, स्त्री, (चुञ्चुरिव रातीति। रा + कः। स्त्रियां ङीप्।) तिन्तिडीद्यूतम्। इति त्रिकाण्डशेषः॥ काँइवीचिर खेला इति भाषा॥

चुञ्चुली, स्त्री, (चुञ्चुरी। रस्य लत्वम्।) तिन्तिडीकास्थिभिर्द्यूतक्रीडा। इति शब्दावली। ६२॥

चुट, तुच्छने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। चोटति नदी ग्रीष्मे। इति दुर्गादासः॥

चुट, इ तुच्छने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। इ, चुण्ट्यते नद्या ग्रीष्मे। इति दुर्गादासः॥

चुट, इ क छेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, चुण्टयति धान्यं लोकः। इति दुर्गादासः॥

चुट, क श्रि छेदे। इति कविकल्पद्रुमः। (चुरां-तुदांच-परं-सकं-सेट्।) क, चोटयति। श्रि, चुटति अचुटीत्। इति दुर्गादासः॥

चुड्ड, क तुच्छने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) टद्वयान्तः। पञ्चमस्वरा। एकटकार इति रामः। तुच्छनमल्पीभावः। क, चुड्डयति नदी ग्रीष्मे। इति दुर्गादासः॥

चुड, इ तीक्ष्णे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) इ, चुण्ड्यते। तीक्ष्णमल्पीभावः। इति दुर्गादासः॥

चुड, इ क छिदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, चुण्डयति। इति दुर्गादासः॥

चुड, इ क रोषे। (चुरां-परं-अकं-सेट्।) इ क, चुण्डयति। इति दुर्गादासः॥

चुड, इ ङ रोषे। (भ्वां-आत्मं-अकं-सेट्।) इ, चुण्ड्यते। ङ, चुण्डते। इति दुर्गादासः॥

चुड्ड, हतौ। हावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकंच-सेट्।) टवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुड्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुण, श्रि छिदि। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श्रि, चुणति अचुणीत् चुचोण। इति दुर्गादासः॥

चुण्टा, स्त्री, (चुण्ट्यतेऽसाविति। चुण्ट छेदे + घञ्। मृत्तिकाखननेन जायमानत्वात्तथात्वम्।) कूपः। इति त्रिकाण्डशेषः॥

चुण्टी, स्त्री, कूपः। इति त्रिकाण्डशेषः॥ उपकूपम्। कूप समीपे स्वल्पजलाधारः। इति हेमचन्द्रः॥

चुत, इर् चरे। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं सेट्। अकं-इति केचित्।) इर्, अचुतत् अचोतीत्। चर इह आश्चेचनम्। चोतति घृतं वह्नौ यज्वा आसिञ्चतीत्यर्थः। इति दुर्गादासः॥

चुतः, पुं, (चोतति चरति मलशोणितादिर्यस्मात्। चुत + घञर्थे कः।) गुह्यद्वारम्। इति शब्दरत्नावली॥

चुतिः, स्त्री, (चोतति चरति मलशोणितादिर्यस्याः। चुत + "सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) गुह्यद्वारम्। इति शब्दरत्नावली॥

चुद, क चुदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) चुदि प्रेरणे। क, चोदयति बाणं चापः। इति दुर्गादासः॥

चुड्ड, हतौ। हावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्।) तवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुद्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थः नायकादीनिति। चुद + कः। निपातनात् नुमागमः। ततः स्त्रियां ङीप्।) कुट्टनी। इति हेमचन्द्रः। ३। १९७॥

चुप, मन्देगतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चोपति खञ्जः। चोपति दुष्टं राजा। इति रमानाथः। इति दुर्गादासः॥

चुम्ब, इ कि चुम्बने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) चुम्बनं मुखसंयोगः। इ, चुम्ब्यते। कि, चुम्बयति चुम्बति कान्ताधरं कामी। प्रियामुखं किम्पुरुषश्चुचुम्बे॥ इति व्यतीहारे आत्मनेपदम्। इति दुर्गादासः॥

चुम्बं, क्ली, (चुम्ब्यतेऽनेनात्र वा। चुम्ब चुम्बने + "अंषेन्द्राग्रेति।" उणां। २। २८। इति रप्रत्ययो नकारलोपश्च।) वदनम्। इत्युणादिकोषः॥

चुम्बकः, पुं, (चुम्बति आकर्षति लौहमिति। चुम्ब + ण्वुल्।) कान्तलोहभेदः। तत्पर्य्यायः। कान्तपाषाणः २ अयस्कान्तः ३ लोहकर्षकः ४। अस्य गुणाः। लेखनत्वम्। शीतत्वम्। मेदोविषगरापहत्वञ्च। इति भावप्रकाशः॥ (विशेषोऽस्य कान्तलोहशब्दे ज्ञेयः॥) धटस्योर्द्धावलम्बनम्। इति मेदिनी। के, ८६॥

चुम्बकः, त्रि, (चुम्बतीति। चुम्ब + ण्वुल्। चुम्बनपरः। धूर्त्तः। बहुग्रन्थैकदेशज्ञः। इति मेदिनी। के, ८६।

चुम्बनं, क्ली, (चुम्ब इ कि चुम्बने + भावे ल्युट्।) मुखसंयोगः। चुमा इति भाषा॥ तस्य स्थानानि यथा, कामशास्त्रे।
"मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि।
गण्डे च कर्णयोश्चैव कपोलभगम्लर्द्धसु।
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह॥"

चुर, कि स्तेये। इति कविकल्पद्रुमः॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट्।) कि, चोरयति चोरति धनं चौरः। इति दुर्गादासः॥

चुरा, स्त्री, (चुर + बाहुलकात् कः। स्त्रियां टाप्।) चौर्य्यम्। इति शब्दरत्नावली॥

चुरी, स्त्री, (चुर + कः। स्त्रियां ङीप्।) उपकूपम्। कूपसमीपस्थाल्पजलाधारः। इति हेमचन्द्रः। ४। १५६॥

चुलुकं, क्ली, (चोलयतीति। चुल + बाहुलकात् उकञ्।) माषमज्जनजलम्। यथा। माषमज्जनजलमाचामं तच्चुलुकमिति महोपनिषत्॥

चुलुकः, पुं, (चोलयति उन्नतो भवतीति। चुल उन्नतौ + बाहुलकात् उकञ्।) घनपङ्कः। इति त्रिकाण्डशेषः॥ प्रसृतिः। भाण्डप्रभेदः। इति हेमचन्द्रः॥

चुलुकी, [न्] पुं, (चुलुक ऊर्द्धोन्नतिर्विद्यतेऽस्य। चुलुक + इनिः।) शिशुमाराकृतिमत्स्यः। इति शब्दरत्नावली॥ (यथा, वाभटे सूत्रस्थाने। ६। ५८।
"चुलुकी नक्रमकरशिशुमारतिमिङ्गिलाः।
राजीचिलिचिमाद्याश्च मांसमित्याहुरप्सुगाः॥")

चुलुम्प, लोपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) अन्तःस्थतृतीयमध्यः। पञ्चमस्वरद्वयी। ओष्ठ्यवर्गशेषोपधः। चुलुम्पति। यगादौ चुलुम्प्यते इत्यादि। न तु नकारजावनुस्वारपञ्चमाविति स्वरसात्प्रकृतित्वे यगादौ तल्लोप इति वाच्यम्। तर्हि नोपधस्यैव पठितुमुचितत्वात्। एवं सति अङ्कादीनां न प्रकृतित्वेऽपि ङमध्यपाठः कथमिति चेन्न। ते तु कस्यचिन्मते ङमध्या एवेति ज्ञापनाय ङमध्याः पठिताः। न च तर्हि इदित् पाठेऽपीष्टसिद्धिरिति वाच्यम्। क्विपि संयोगान्तलोपे इदित्पाठे चुलुन् चुलुम्प लोपे चुलुम् इति भेदात्। एवं सर्व्वत्र। इति दुर्गादासः॥

चुलुम्पः, पुं, (चुलुम्प्यते इति चुलुम्पनमिति वा। चुलुम्प + भावे घञ्।) बाललालनम्। इति जटाधरः॥